# पाठ- ८
# परार्थे आत्मोत्सर्गः

**सारान्शः**

एकदा राजा भोजः विक्रमादित्यस्य सिंहासने उपविशति । तदा सिंहासने संलग्ना पुत्तलिका कथाम् श्रावयन्ती कथयति यत् एकदा राजा विक्रमः वनं गच्छति । तस्मिन् वने सः खगानां वार्तालापं शृणोति। दिने खगः यत् आश्चर्यम् पश्यति तद् दृष्ट्वा दुःखी भवति । खगानां पिता, चिरंजीवी, दुःखनिदानस्य उपायं कथयति- "दुःखी जनः सुहृदि दुःखं निवेद्य सुखी भवति ।"खगः कथां श्रावयति। शैवालघोषपर्वते पलाशनगरे वकासुरः नामकः राक्षसः प्रतिदिनं एकं मानवं भक्षयति। संत्रस्ताः जनाः तस्मै प्रतिदिनं गृहक्रमेण एकम् मानुषं दातुम् वचनं यच्छन्ति । अनेन प्रकारेण बहुकालः व्यतीतः । क्रमेण एकस्य ब्राह्मणस्य वारः आगतः। सः ब्राह्मणः पूर्वजन्मनि खगस्य मित्रम् आसीत् । तं दृष्ट्वा सः खगः अपि दुःखी भवति । एतत् श्रुत्वा पक्षिणः कथयन्ति यत् वस्तुतः तद् एव मित्रम् यत् मित्रस्य दुःखे दुःखी सुखे च प्रसन्नः भवति। खगानां वचनानि श्रुत्वा राजा विक्रमादित्यः ब्राह्मणाय अभयं दत्वा स्वयमेव वध्यशिलायाम् उपविशति । प्रसन्नमुखं राजानं दृष्ट्वा विस्मितः राक्षसः तस्य प्रसन्नतायाः कारणं पृच्छति । राजा कथयति यत् परार्थे एव स्वेच्छया सः प्राणान् दातुम् उद्यतः अस्ति। अतः सः प्रसन्नः अस्ति । राक्षसः आत्मनः मनोरथं पूरयतु।राक्षसः महाराजविक्रमादित्यस्य परार्थे शरीरत्यागस्य गुणं दृष्ट्वा तं 'साधुः' इति कथयति । सः राजानं कथयति यत् भवान् सर्वेषां प्राणिनां दुःखानि निवारयसि अतः त्वं धनसम्पदः प्राप्नोषि। तव परोपकारभावनया अहम् अतीव प्रसन्नः अस्मि । तदनन्तरम् वरदानाय आग्रहं करोति । 'राजा तु "भवान् जीवहिंसां त्यजतु" इति वरं याचते। राक्षसः जीवहिंसां त्यजति । पुत्तलिका पुनः राजानं भोजं सिंहासने उपवेष्टुम् प्रेरयति ।

**मुख्य बिन्दवः**

'सिंहासनद्वात्रिंशिका नाम ग्रन्थः एकः मनोरंजकः शिक्षाप्रदश्च कथासंग्रहः अस्ति । अयं ग्रन्थः 'द्वात्रिंशत्पुत्तलिका' एवं च 'विक्रमचरितम्' नामभ्यामपि प्रसिद्धः । यदा महाराजः भोजः विक्रमादित्यस्य सिहासनं अरोढुम् प्रयतते तदा सिंहासनजटिताः पुत्तलिकाः भोजस्य योग्यतां परीक्षितुम् एकैकशः द्वात्रिंशत् पुत्तलिकाः विक्रमादित्यस्य शौर्यकथाः श्रावयन्ति । अस्याः कथायाः द्विविधं संस्करणं प्राप्यते- एकम् उत्तरभारतीयम् द्वितीयं दक्षिणभारतीयम् च । दक्षिणभारतीयं संस्करणं 'विक्रमचरितम्' इति कथ्यते । लेखकविषये पूर्णज्ञानं नोपलभ्यते ।

**अवगच्छामः**

परेषाम् उपकारः परोपकारः इति कथ्यते । अस्मिन् संसारे सत्पुरुषाः परोपकाराय जीवनं धारयन्ति । ते आत्मसुखं दुःखं वा अविचिन्त्य अहर्निशं समाजस्य देशस्य च कल्याणाय एव प्रयासरताः भवन्ति अस्माकं देशे परोपकारस्य अत्यधिक महत्त्वं वर्तते । परोपकारविषये वर्णितम् अस्ति।-
राजा भोजः विक्रमादित्य इव परोपकारी, सदाचारी, विद्वद्जनानां प्रेमी आसीत्। भोजस्य पितुः नाम सिन्धुलः, नगर्याः नाम च धारा आसीत्। सः सप्तपंचाशत्वर्षाणि राज्यमकरोत्। तस्य राज्ये जनाः सदाचारिणः सन्तुष्टाः, धार्मिकाः च आसन् । भोजस्य राज्ये चतुर्दिक्षु सुव्यवस्था आसीत्। तस्य राजभवने नवरत्नाः आसन्। कलाकौशलादीनां विकासः सुष्ठुरूपेण च अभवत् ।

**आवश्यकोऽयं ज्ञानम्**

- अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।<br>परोपकारः पुण्याय पापाय परपीडनम् ।।
- भवन्ति नम्रास्तरवः फलोद्गमैः,<br>नवाम्बुभिर्दूरविलम्बिनो घनाः ।<br>अनुद्धता सत्पुरुषाः समृद्धिभिः,<br>स्वभाव एवैष परोपकारिणाम्।।
- श्रोत्रं श्रुतनैव न कुण्डलेन,<br>दानेन पाणिर्नतु कंकणेन।<br>विभाति कायः करुणापराणां,<br>परोपकारेण न तु चन्दनेन ।।
- अयं निजः परोवेति गणना लघुचेतसाम् ।<br>उदारचरितानान्तु वसुधैव कुटुम्बकम् ।।<br>(हितोपदेशः)
- परोपकाराय फलन्ति वृक्षाः,<br>परोपराय वहन्ति नद्यः।<br>परोपकाराय दुहन्ति गावः,<br>परोपकारार्थमिदं शरीरम् ।।
- पिबन्ति नद्यः स्वयमेव नाम्भः,<br>स्वयं न खादन्ति फलानि वृक्षाः ।<br>नादन्ति सस्यं खलु वारिवाहाः,<br>परोपकाराय सतां विभूतयः ।।

**व्याकरण बिन्दवः शब्द भण्डाराश्च**

**प्रातिपदिकम्-** धातुं प्रत्ययं च वर्जयित्वा कोऽपि अर्थवान् शब्दः 'प्रतिपादिकम्' कथ्यते । यदा प्रातिपदिकम् विभक्तियुक्तं भवति तदा तस्य वाक्ये प्रयोगः क्रियते ।

**वृद्धि सन्धिः-** अ / आ एताभ्यां वर्णाभ्यां परे ए / ऐ वर्णौ भवतः चेत् तर्हि पूर्वपरयोः स्थाने 'ऐ वर्णः भवति । यदि अ आ वर्णाभ्यां परे ओ / औ वर्णौ भवतः तदा 'औ भवति ।




**शब्दार्थाः**
**पिशुनः** = चुगलखोर
**संलापम्** = वार्तालाप को
**सुहृदि** = मित्र पर
**अंगीकृतम्** = स्वीकार कर लिया गया
**विस्मितः** =आश्चर्यचकित
**समायाति** = आ जाता है
**परिहरसि** = दूर करते हो
**श्लाघ्याम्** = प्रशंसनीय

## योग्यतां वर्धयत

संसारे परोपकार एव स गुणो विद्यते, येन मनुष्येषु जीवेषु वा सुखस्य प्रतिष्ठा वर्तते। समाजसेवाया भावना, देशप्रेमभावना देशभक्तिभावना, दीनोद्धरणभावना, परदुःखकातरता, सहानुभूतिगुणस्य सत्ता च परोपकारगणस्य ग्रहणेनैव भवति। परोपकारकरणेन हृदयं पवित्र। सत्त्वभावसमन्वितं सरल विनयोपेतं सरसं सदयं च भवति। परोपकारिणः परेषां दुःखं स्वीयं दुखं मत्वा तन्नाशाय यतन्ते। ते दीनेभ्यो दानं ददति, निर्धनेभ्यो धनम्, वस्त्रहीनेभ्यो वस्त्रम्, पिपासितेभ्यो जलम्, ' बुभुक्षितेभ्योऽन्नम्, अशिक्षितेभ्यश्च शिक्षां ददति। सज्जना : परोपकारेणैव प्रसन्ना भवन्ति। ते परोपकरणे स्वीयं दुःखं न गणयन्ति।

## पाठ संप्रेष्यः

- 'परार्थे आत्मोत्सर्गः' इति पाठः 'सिंहासनद्वात्रिंशिका ग्रन्थात् उद्धृतः ।
- महाराजविक्रमादित्यः दयालुः, परोपकारी, प्रतापी च नृपः आसीत् ।
- सर्वेषां जीवानां प्राणाः प्रियाः । अतः अस्माभिः जीवरक्षा करणीया ।
- साधवः स्वयं कष्टं सोढ़वा सर्वसत्त्वहितैषिणः भवन्ति ।
- अव्ययानां रूपपरिवर्तनं न भवति ।
- धातुना सह 'क्त' प्रत्ययं संयोज्य भूतकालिक- अर्थः जायते ।
- यदा धातोः पूर्वम् उपसर्गः आयाति तदा क्त्वा स्थाने ल्यप् प्रत्ययः भवति, तत्पदं च अव्ययं भवति ।
- वाच्यं त्रिविधं भवति- कर्तृवाच्यम्, कर्मवाच्यम्, भाववाच्यम् वर्ण-संश्लेषणेन पदनिर्माणं भवति ।

## अधिकाङ्क्षानाम् अर्जनं कथं भवेत्

- पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात्।
- अध्यायस्य समनार्थी पद्य सूक्तयः अपि जानीयात्।

## स्व मूल्याङ्कनम् कुरुत

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत।
- परोपकार इति विषये निर्मितानां अन्य श्लोकानां अन्वेषणं कृत्वा अर्थं लिखत।